श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ दशमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ दशमः सर्गः ॥

## भ्रात्रा सह वैरकारणस्य कथनप्रसङ्गे सुग्रीवेण स्वकर्तृके वालिनः प्रसादने वालिकर्तृके च स्वस्य निष्कासने घटितस्य वृत्तान्तस्य वर्णनम्

ततः क्रोधसमाविष्टं संरब्धं तमुपागतम्।
अहं प्रसादयाञ्चक्रे भ्रातरं हितकाम्यया॥ **4.10.1** ॥

दिष्ट्यासि कुशली प्राप्तो निहतश्च त्वया रिपुः।
अनाथस्य हि मे नाथस्त्वमेकोऽनाथनन्दन॥ **4.10.2** ॥

इदं बहुशलाकं ते पूर्णचन्द्रमिवोदितम्।
छत्रं सवालव्यजनं प्रतीच्छस्व मया धृतम्॥ **4.10.3** ॥

आर्तस्तत्र बिलद्वारि स्थितः संवत्सरं नृप।
दृष्ट्वा च शोणितं द्वारि बिलाच्चापि समुत्थितम्॥ **4.10.4** ॥

शोकसंविग्नहृदयो भृशं व्याकुलितेन्द्रियः।
अपिधाय बिलद्वारं शैलशृङ्गेण तत् तदा॥ **4.10.5** ॥

तस्माद् देशादपाक्रम्य किष्किन्धां प्राविशं पुनः।
विषादात्त्विह मां दृष्ट्वा पौरैर्मन्त्रिभिरेव च॥ **4.10.6** ॥

अभिषिक्तो न कामेन तन्मे क्षन्तुं त्वमर्हसि।
त्वमेव राजा मानार्हः सदा चाहं यथा पुरा॥ **4.10.7** ॥

राजभावे नियोगोऽयं मम त्वद्विरहात् कृतः।
सामात्यपौरनगरं स्थितं निहतकण्टकम्॥ **4.10.8** ॥

न्यासभूतमिदं राज्यं तव निर्यातयाम्यहम्।
मा च रोषं कृथाः सौम्य मम शत्रुनिषूदन॥ **4.10.9** ॥

याचे त्वां शिरसा राजन् मया बद्धोऽयमञ्जलिः।
बलादस्मिन् समागम्य मन्त्रिभिः पुरवासिभिः॥ **4.10.10** ॥

राजभावे नियुक्तोऽहं शून्यदेशजिगीषया।
स्निग्धमेवं ब्रुवाणं मां स विनिर्भर्त्स्य वानरः॥ **4.10.11** ॥

धिक्त्वामिति च मामुक्त्वा बहु तत्तदुवाच ह।
प्रकृतीश्च समानीय मन्त्रिणश्चैव सम्मतान्॥ **4.10.12** ॥

मामाह सुहृदां मध्ये वाक्यं परमगर्हितम्।
विदितं वो मया रात्रौ मायावी स महासुरः॥ **4.10.13** ॥

मां समाह्वयत क्रुद्धो युद्धाकाङ्क्षी तदा पुरा।
तस्य तद् भाषितं श्रुत्वा निःसृतोऽहं नृपालयात्॥ **4.10.14** ॥

अनुयातश्च मां तूर्णमयं भ्राता सुदारुणः।
स तु दृष्ट्वैव मां रात्रौ सद्वितीयं महाबलः॥ **4.10.15** ॥

प्राद्रवद् भयसन्त्रस्तो वीक्ष्यावां समुपागतौ।
अभिद्रुतस्तु वेगेन विवेश स महाबिलम्॥ **4.10.16** ॥

तं प्रविष्टं विदित्वा तु सुघोरं सुमहद्बिलम्।
अयमुक्तोऽथ मे भ्राता मया तु क्रूरदर्शनः॥ **4.10.17** ॥

अहत्वा नास्ति मे शक्तिः प्रतिगन्तुमितः पुरीम्।
बिलद्वारि प्रतीक्ष त्वं यावदेनं निहन्म्यहम्॥ **4.10.18** ॥

स्थितोऽयमिति मत्वाहं प्रविष्टस्तु दुरासदम्।
तं मे मार्गयतस्तत्र गतः संवत्सरस्तदा॥ **4.10.19** ॥

स तु दृष्टो मया शत्रुरनिर्वेदाद् भयावहः।
निहतश्च मया सद्यः स सर्वैः सह बन्धुभिः॥ **4.10.20** ॥

तस्यास्यात्तु प्रवृत्तेन रुधिरौघेण तद्बिलम्।
पूर्णमासीद् दुराक्रामं स्तनतस्तस्य भूतले॥ **4.10.21** ॥

सूदयित्वा तु तं शत्रुं विक्रान्तं तमहं सुखम्।
निष्क्रामं नैव पश्यामि बिलस्य पिहितं मुखम्॥ **4.10.22** ॥

विक्रोशमानस्य तु मे सुग्रीवेति पुनः पुनः।
यतः प्रतिवचो नास्ति ततोऽहं भृशदुःखितः॥ **4.10.23** ॥

पादप्रहारैस्तु मया बहुभिः परिपातितम्।
ततोऽहं तेन निष्क्रम्य पथा पुरमुपागतः॥ **4.10.24** ॥

तत्रानेनास्मि संरुद्धो राज्यं मृगयताऽऽत्मनः।
सुग्रीवेण नृशंसेन विस्मृत्य भ्रातृसौहृदम्॥ **4.10.25** ॥

एवमुक्त्वा तु मां तत्र वस्त्रेणैकेन वानरः।
तदा निर्वासयामास वाली विगतसाध्वसः॥ **4.10.26** ॥

तेनाहमपविद्धश्च हृतदारश्च राघव।
तद्भयाच्च महीं सर्वां क्रान्तवान् सवनार्णवाम्॥ **4.10.27** ॥

ऋष्यमूकं गिरिवरं भार्याहरणदुःखितः।
प्रविष्टोऽस्मि दुराधर्षं वालिनः कारणान्तरे॥ **4.10.28** ॥

एतत्ते सर्वमाख्यातं वैरानुकथनं महत्।
अनागसा मया प्राप्तं व्यसनं पश्य राघव॥ **4.10.29** ॥

वालिनश्च भयात् तस्य सर्वलोकभयापह।
कर्तुमर्हसि मे वीर प्रसादं तस्य निग्रहात्॥ **4.10.30**॥

एवमुक्तः स तेजस्वी धर्मज्ञो धर्मसंहितम्।
वचनं वक्तुमारेभे सुग्रीवं प्रहसन्निव॥ **4.10.31**॥

अमोघाः सूर्यसङ्काशा निशिता मे शरा इमे।
तस्मिन् वालिनि दुर्वृत्ते पतिष्यन्ति रुषान्विताः॥ **4.10.32**॥

यावत् तं नहि पश्येयं तव भार्यापहारिणम्।
तावत् स जीवेत् पापात्मा वाली चारित्रदूषकः॥ **4.10.33**॥

आत्मानुमानात् पश्यामि मग्नस्त्वं शोकसागरे।
त्वामहं तारयिष्यामि बाढं प्राप्स्यसि पुष्कलम्॥ **4.10.34**॥

तस्य तद् वचनं श्रुत्वा हर्षपौरुषवर्धनम्।
सुग्रीवः परमप्रीतः सुमहद्वाक्यमब्रवीत्॥ **4.10.35**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे दशमः सर्गः॥